लक्ष्यं विश्वमानम्

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 1st Semester Examination, 2022-23

## SANACOR01T-SANSKRIT (CC1)

Time Allotted: 2 Hours

Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. अधोलिखितेषु पञ्चानां प्रश्नानामुत्तरं संस्कृतभाषया देवनागरीलिप्या च लेख्यम्। 2×5 = 10

(क) किं तावत् रघुवंशस्य उत्सभूतं महाकाव्यम् ? अस्य महाकाव्यस्य रचयिता कः ?

(ख) रघुवंशस्य प्रसिद्धा टीका का ? को वा तस्याः टीकायाः रचयिता ?

(ग) दिलीपः कः ? तस्य कायाकारः कथमासीत् ?

(घ) दिलीपः कथं प्रजानां पितृपदं प्राप्तवान् ?

(ङ) 'प्रणवश्छन्दसामिव'— प्रणवः को भवति ? कस्मिन् प्रसङ्गे कविना एवमुक्तम् ?

(च) 'क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः'— इत्यत्र क्वद्वयेन किं ज्ञायते ?

(छ) दिलीपचरित्रस्य परस्परविरुद्धगुणा विव्रियन्ताम्।

### SECTION-B

2. यथाभिमतं प्रश्नस्य एकस्योत्तरं प्रदेयम्। 10×1 = 10

(क) शिवलाभाय पार्वत्याः कठोरं तपः कुमारसम्भवमाश्रित्य वर्ण्यताम्।

(ख) 'उपमा कालिदासस्य'— इत्युक्तेः तात्पर्यं कुमारसम्भवमिति महाकाव्यस्य पञ्चमसर्गमाश्रित्य लिख्यताम्।

3. अधोलिखितयोः एकस्य श्लोकस्य संस्कृतेन देवनागर्या च व्याख्या लेख्या। 5×1 = 5

(क) मनीषिताः सन्ति गृहेषु देवतास्तपः क्व वत्से क्व च तावकं वपुः।
पदं सहेत भ्रमरस्य पेलवं शिरीषपुष्पं न पुनः पतत्रिणः॥

(ख) महार्हशय्यापरिवर्तनच्युतैः स्वकेशपुष्पैरपि या स्म दूयते।
अशेत सा बाहुलतोपधायिनी निषेदुषी स्थण्डिल एव केवले॥

## SECTION-C

4. यथाभितं प्रश्नस्य <u>एकस्योत्तरं</u> प्रदेयम् – 10×1 = 10

(क) वनेचरः कः ? वनेचरवचनमनुसृत्य दुर्योधनस्य राज्यशासनपद्धतिः लेख्या।

(ख) 'भारवेरर्थगौरवम्'– इति उक्तेः तात्पर्यं किरातर्जुनीयमिति महाकाव्यस्य प्रथमसर्गमाश्रित्य वर्ण्यताम्।

5. अधोलिखितयोः <u>एकस्य</u> श्लोकस्य संस्कृतेन देवनागर्या च व्याख्या लेख्या – 5×1 = 5

(क) क्रियासुयुक्तैर्नृप चारचक्षुषो न वञ्चनीयाः प्रभवोऽनुजीविभिः।
अतोऽर्हसि क्षन्तुमसाधु साधु वा हितं मनोहारि च दुर्लभं वचः॥

(ख) कथाप्रसङ्गेन जनैरुदाहृतादनुस्मृताखण्डलसूनुविक्रमः।
तवाभिधानाद् व्यथते नताननः स दुःसहान्मन्त्रपदादिवोरगः॥

## SECTION-D

6. अधोलिखितेषु <u>विषयद्वयमाश्रित्य</u> संस्कृतेन देवनागर्या च टीका लेख्या। 5×2 = 10

नैषधचरितम्, भट्टिकाव्यम्, मेघदूतम्, रघुवंशम्।

——×——